**Shikshan Sanshodhan** : Journal of Arts, Humanities and Social Sciences
Monthly, Peer-Reviewed, Refereed, Indexed Journal
Volume - 8, Issue - 10, October - 2025
ISSN(o): 2581-6241
Impact Factor: 9.134

DOIs:10.2018/SS/202510015 --:-- Research Paper / Article / Review

# रामायणस्य सङ्गीतांशाः

**Pareekshith B Vashishta**
Research Scholar, Department of Music, KSGH Music and Performing Arts University, Mysuru, India
Email – spsvallabha@gmail.com

***सारः*** *भारतीयसङ्गीतः प्राचीनः गहनश्च । सङ्गीतस्यास्य मूलं सामवेदः । तथा भारतस्य आदिकाव्यं रामायणमिति मन्यते । वेदेष्वेव प्रौढरीत्या सङ्गीतमुपयुक्तः । वेदानन्तरं गान्धर्वः मार्गश्च प्रसिद्धौ । मार्गात् पूर्वम् आख्यागानमासीत् । आख्या नाम रामायणमहाभारतौ । काव्यगायनमपि प्राचीनतमा वर्तते । रामायणे कुशीलवौ गायनरीत्या रामायणं कथयतः इति विवरणं वर्तते । रावणस्तु सङ्गीतपण्डितः इति उल्लेखमपि लभ्यते । लेखस्यास्य आश्यस्तु रामायणस्य सङ्गीतविचारविवेचनम् ।*

***प्रमुखपदाः*** *- रामायणम्, गानम्, वाद्यम्, मार्गः*

## 1. पीठिका

भारतस्य नेत्रे रामायणमहाभारतौ । रामायणम् आदिकाव्यमिति भारते सर्वत्र प्रसिद्धम् । काव्येऽस्मिन् नीति-धर्मशास्त्र-युद्धविद्यादि विविधवस्तुविषयाः महाकाव्यलक्षणानि च वर्तन्ते । धर्ममार्गस्य श्रेष्ठतां ग्रन्थमेतत् प्रतिपादयति । मनुष्यसम्बन्धी भावना तथा च पुत्राणां कर्तव्यप्रज्ञा इत्यादि विषयेषु आदर्शप्रायकाव्यं रामायणम् । रामायणे लौकिक विचारा अपि लभ्यन्ते । कृषिपद्धतिरित्यादि लौकिकविषयेष्वपि रामायणमुत्तममेव । यः रामायणं पठति सः भारतस्य भौगोलिकप्रदेशान् अपि ज्ञातुमर्हति । तथा सङ्गीतविषयोऽपि वर्तते ।

भारतीय सङ्गीतस्तु प्राचीनः वेदमूलियश्च । ऋग्वेदादारभ्य उपनिषत्पर्यन्तं वैदिकसाहित्ये सङ्गीतस्य प्रयोगः सुचारुरूपेण द्रष्टुं शक्यते । "**गीतिषु सामाख्या**" इति नाट्यशास्त्रे भरतमुनिः सङ्गीतमूलं विवृणोति । सामगानानन्तरं गान्धर्वः मार्गश्च प्रसिद्धौ अभवताम् । मार्गस्तु वैदिकसङ्गीतरीत्या एव निबद्धक्रमसङ्गीतः । गान्धर्वस्य प्रयोगम् अद्य नष्टम् । पूर्वाचार्याः मार्गसङ्गीतश्लोकान् स्वग्रन्थेषु उद्धरन्ति । वैदिकगानानन्तरम् आख्यागानं प्रामुख्यम् अवाप्तम् । आख्यागाने रामायणमहाभारतादिकाव्यानां स्वरबद्ध गानम् वर्तते । आख्यागानमपि सङ्गीतेतिहासे मुख्यमेव ।

रामायणे कुशीलवौ रामकथां जागतुः इति श्लोकाः लभ्यन्ते । भरतस्य चित्रकूटप्रयाणसन्दर्भे ऋष्याश्रमे विविधसङ्गीताचार्यान् सः पश्यति । रावणस्तु स्वतः वैणिकः इति विविधस्थानेषु प्रतिपादितम् । रावणहस्त इति वाद्यमपि आसीत् । अनेकत्र सङ्गीतविचाराः रामायणे सन्ति । न रामायणेन विना सङ्गीतस्य इतिहासरचना । अतः रामायणस्य सङ्गीतविषयकविमर्शा ऐतिहासिक दृष्ट्या अपि च सङ्गीतदृष्ट्या अवश्यं करणीयम् ।

## 2. रामायणे सङ्गीतोल्लेखाः

रामायणे विविधकाण्डेषु विविधसर्गेषु सङ्गीतविषयकश्लोकाः सन्ति । बालकाण्डस्य चतुर्थे सर्गे प्रथमतः कुशीलवौ "**भ्रातरौ स्वरसम्पन्नौ**" इति श्लोकभागः वर्तते । जाति-मूर्छना इत्यादि सङ्गीतपारभाषिकशब्दाः अत्र लभ्यन्ते ।

**पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।**
**जातिभिस्सप्तभिर्बद्धं तन्त्रीलयसमन्वितम्।।1.4.8।।**
**तौ तु गान्धर्वतत्त्वज्ञौ मूर्छनास्थानकोविदौ।**
**भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ।।1.4.10।।**

कुशीलवौ सप्तजातिभिस्समन्वितनिबद्धगानं कृतवन्तौ । अत्र जातिः निबद्धश्च पारिभाषिकशब्दौ । विद्यमानरागपद्धतेः मूलमातृका एव जातिः । विविधरागलक्षणसमष्टिरूपः जातिः । निबद्धसङ्गीतमित्युक्ते ताल-मातु-लयादिभिः बद्धम् । सङ्गीते निबद्धानिबद्धश्च क्रमौ वर्तेते । रामायणकाले एतत्क्रमौ आसीदिति अयं श्लोकात् स्पष्टम् । **तौ गान्धर्वतत्त्वज्ञौ** इति श्लोकभागेन गान्धर्वपद्धतिरपि तत्काले आसीदति मन्तव्यम् । मूर्छना तु सङ्गीते मुख्यशब्दः । मूर्छनादेव रागपद्धतेः विकसनं भवेत् । अत्र जातिः शुद्धा

वर्तते । जाती शुद्धसङ्करेति द्विधा । शुद्धजात्यां एकस्वराय ग्रह-अंश-न्यासेत्यादि अंशाः वर्तन्ते । जाति-मूर्छना-निबद्धरूपगीतकारणात् तद्गानं शास्त्रीयमिति न सन्देहः । एतादृश गानक्रमं वीक्ष्य महामहोपाध्यायः डा. रा सत्यनारायण महोदयः प्रायः तत्काले गान्धारग्रामं नास्तीति मन्यते । परन्तु डा. वि राघवन् महोदयः प्रायः कुशालवौ गान्धारग्रामे गानं कृतवन्तौ इति अभिप्रायं प्रकुर्वन्ति । नाट्यशास्त्रे एकः ग्रामः सप्तमूर्छनाभ्यः जन्मं ददातीति उल्लेखो अस्ति । अत एव अत्र सप्त इति सङ्ख्यां दृष्ट्वा प्रायः गान्धारग्रामे तौ गायतः इति मन्तव्यम् । **तन्त्रीलयसमन्वितौ** इत्यपि अत्र वर्तते । तन्त्रीवाद्याः वेदकालीन एव । प्रायः अत्र तन्त्रीवाद्याः श्रुतिवाद्यरत्या उपयुक्तः।

**ततस्तु तौ रामवचःप्रचोदितावगायतां मार्गविधानसम्पदा।**
**स चापि रामः परिषद्गतः शनैर्बुभूषयासक्तमना बभूव।।1.4.36।।**

कुशीलवौ मार्गपद्धतिरीत्या गायतः इति श्लोकमेतत् विशदयति । देशीमार्गौ इति सङ्गीतपद्धती द्विधा । मार्गसङ्गीते वेदसङ्गीतरीत्या निर्दिष्टता वर्तते । मार्गसङ्गीतश्लोकान् नान्यदेवादिशास्त्रकाराः उद्धरन्ति ।

बालकाण्डे विविधवाद्यानामुल्लेखाश्च लभ्यन्ते । नाट्यशास्त्रे तत-सुषिर-अवनद्ध-घनवाद्यानाम् विवरणं वर्तते परन्तु रामायणे हस्त-मुखवाद्यौ एव ।

**दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।**
**नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ।।1.5.18।।**

बालकाण्डे अयोध्यावर्णनप्रसङ्गे श्लोकमेतत् वर्तते । अत्र दुन्दुभि-मृदङ्ग-वीणा-पणववाद्यनादसमन्वितमिति अयोध्या वर्णितम् । रामपट्टाभिषेककालायोध्यावर्णने "**सर्ववादित्रनिस्वनाम्**" (२.७.४) इति श्लोकपादोऽस्ति ।

गायनवादनौ वृत्तिरपि आसीदिति रामायणात् ज्ञायते । ततस्ततः गायकसङ्घ इत्यादि उल्लेखो भवति । अयोध्याकाण्डे रामपट्टाभिषेकसन्दर्भे च प्रस्तापमेतदस्ति ।

**नटनर्तकसङ्घानां गायकानां च गायताम्।**
**मनः कर्णसुखा वाच श्शुश्रुवुश्च ततस्ततः।।2.6.14।।**

रामायणकाले सङ्गीतः विलासोपभोगाय उपयुक्तम् इति मन्यते किन्तु अन्तःपुरे सङ्गीतस्यापेक्षता वर्णितम् । यदा दशरथः कैकेय्यै अन्तःपुरं गच्छति तदा वाद्यसाकं गच्छति । परन्तु आयोध्याकाण्डे एव मङ्गलकार्य-शोभायात्रार्थमपि गानमुपयुक्तमिति उल्लेखाः सन्ति । प्रायः मार्ग-देशीभेदः एतदेव । यज्ञकाले वा मङ्गलकार्ये उत्सवकाले च मार्गसङ्गीतं तथा विनोदकाले अन्तःपुरे च देशीसङ्गीतमिति उहितुं शक्यते।

**वादित्ररवसङ्घुष्टं कुब्जा वामनिकायुतम्।**
**लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभितैः।।2.10.13।।**

अयोध्याकाण्डे यदा भरतः कैकेयीप्रेरितरामवनवासविचारं जानाति तदा झटिति रामम् आनेतुं प्रस्थितवान् । मार्गमध्ये भरद्वाजस्य आश्रमे आतिथ्यं स्वीकृतवान् । भरद्वाजः समस्तवैभवोपेत सत्कारं दत्तवान् । तदा गन्धर्वान् तुम्बुरुनारदादिसङ्गीतकोविदान् आवाह्य भरतस्य तोषणार्थं गीतनृत्यादीन् योजितवान् भरद्वाजः । तत्रापि सङ्गीतवाद्यानाम् उल्लेखः लभ्यते । बिल्ववृक्षेण मृदङ्गवादनं कृतम् इत्यादि अलङ्कारपूरितश्लोकाः सन्ति ।

**बिल्वा मार्दङ्गिका आसन् शम्याग्राहा विभीतकाः।**
**अश्वत्था नर्तकाश्चासन्भरद्वाजस्य शासनात्।।2.91.49।।**

सङ्गीतनृत्यादयः न केवलं अयोध्या-केकय-लङ्का इत्यादि राज्ये परन्तु किष्किन्धायामपि आसीत् । रामायणकाले एव सङ्गीतस्य व्यापकत्वं एतत् स्थापयति । किष्किन्धायाः प्रस्रवणपर्वतप्रदेशे रामलक्ष्मणौ वर्षाकाले निवसति । तत्र विविधनादान् श्रुणोति । मृदङ्गेत्यादि वाद्याः सर्वत्रासीत् ।

**गीतवादित्रनिर्घोषश्श्रूयते जयतां वर।**
**नर्दतां वानराणां च मृदङ्गाडम्बरै स्सह ।। 4.27.27।।**

सुग्रीवस्य गृहमपि विविधवाद्यनादैः समन्वितम् । अत्र सङ्गीतरचनायां क्रमम् अपि वाल्मीकि महर्षिः स्थापयति । धातु-मातुसमायुक्तसङ्गीतरचनाः शोभन्ते सुग्रीवगृहे । यत्र धातुभ्यः संवादिमातु भवति तत्र प्रायः गीत इति रचनाक्रमं भवितुमर्हति । ततस्ततः आगतवन्तः सङ्गीतश्लोकेषु अधिकतया वाद्यसमूहस्य उल्लेखो एव । वाद्यसम्मेलनं भरतः स्वस्य नाट्यसास्त्रे "कुतप" इति शब्देन विवृणोति ।

**प्रविशन्नेव सततं शुश्राव मधुरस्वरम्।**

**तन्त्रीगीतसमाकीर्णं समगीतपदाक्षरम्।।4.33.21।।**

लङ्कायामपि सङ्गीतस्तु विद्यमान एव । रावणः स्वयं सङ्गीतपटुः । लङ्कायां गृहे गृहे अपि वाद्यनिर्घोषः आसीदिति मारुतिः दृष्टवान् । "**हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्सरैः।**" (५.४.५) । तत्र स्त्रियः त्रिस्थानेषु गानं कर्तुं शक्ताः इति रामायणेन ज्ञातम् । मन्द्र-मध्य-ताराः त्रिस्थानाः वा त्रिस्थायी ।

**शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम्।**
**स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव।।5.4.10।।**

रावणस्य निवेशने अपि विविधवाद्याः वर्तन्ते । पूजार्थं च वाद्यप्रयोगाः आसीदिति सुन्दरकाण्डः वदति । भेरि-शङ्ख इत्यादि वाद्याः अत्र लभ्यन्ते ।

**भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितम्।**
**नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा।।5.6.12।।**

रामायणमहाभारतयोः युद्धवर्णनमपि अति सुन्दरम् । युद्धकाले उपयुज्यमान भेरी-नगारी इत्यादि रणवाद्यानाम् उल्लेखः रामायणे अनेके श्लोकेषु वर्तन्ते । रावणः स्वयं वैणिकः इति सूचयति रामायणम् । युद्धकाण्डे रावणः रणरङ्गमेव वेदीति भावयति । धनुरेव वीणा धनुष्टङ्कार एव नादमिति घोषयति ।

**नजानातिपुरावीर्यममयुद्धेसराघवः ।**
**ममचापमयींवीणांशरकोणैःप्रवादिताम् ।।6.24.43।।**
**ज्याशब्दतुमुलांघोरामार्तभीतमहास्वनाम् ।**
**नाराचतलसन्नादांतांममाहितवाहिनीम् ।।6.24.44।।**
**अवगाह्यमहारङ्गंवादयिष्याम्यहंरणे ।**

एवं रावणः रणाङ्गणचापनाचारान् च सङ्गीतावयवाः इति भावितवान् । एतत् दृष्ट्वा रावणः सङ्गीतकोविदः इति स्पष्टतया मन्तव्यम् । तस्य वीणाकौशलमपि एतस्मात् ज्ञातुं शक्यते ।

### 3. समारोपः

रामायणम् न केवलं धर्मज्ञानावाप्त्यर्थं परन्तु भारतस्य इतिहास-कला-जीवनपद्धतिः-पशुसमृद्धिः इत्यादि अनेक विचारान् ज्ञातुं च पठितव्यम् । यादृच्छयास्थितसङ्गीतपरश्लोकाः ऐतिहासिकदृष्ट्यापि प्रमुखाणि एव । रामायणे अन्यसङ्गीतपारिभाषिकशब्दाः सन्ति चेदपि अद्य तान् व्याख्यातुं ज्ञानं नष्टम् किन्तु अस्माकं सङ्गीतशास्त्रज्ञानं भरतस्य नाट्यसास्त्रात् प्रारम्भमवाप्नोति । भरतपूर्वशास्त्रग्रन्थाः अद्य न लभ्यन्ते ।अद्य विद्यमान सङ्गीतज्ञानया रामयणव्याख्या करोति चेदपि अनेकांशान् दृष्टुं शक्यते । ते यादृच्छया आगच्छति परन्तु सदा महत्त्वपूर्णमेव । देशीमार्गयोः समुचित उपयोगः रामायण्काले अस्तीति रामायणमेव निदर्शनम् । यज्ञयागादिषु वैदिकसङ्गीतस्य प्रयोगः वेदैः ज्ञातव्यम् । रामायणे सम्पूर्णतया लौकिकगानस्य प्रयोगमेव द्रष्टुं शक्यते । एतस्मात् वैदिक-लौकिकगानयोः सामरस्यम् उचित उपयोगमपि ज्ञातुं शक्यते । काव्यगायन-रणाङ्गणवादनादविषये रामायणं सूक्तसूचनां यच्छति । अत एव रामायणं न केवलं श्रद्धावद्भ्यः परन्तु सङ्गीतविद्यार्थिभ्यश्च पठनीयम् ।

### 4. परामर्शग्रन्थाः

१. ಕರ್ನಾಟಕದ ಕಲೆಗಳು, ಎರಡನೆಯ ಸಂಪುಟ, ಸಂಗೀತ [ಭಾಗ-೧], ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಡಾ. ರಾ. ಸತ್ಯನಾರಾಯಣ, ಕನ್ನಡ ಸಾಹಿತ್ಯ ಪರಿಷತ್ತು, ಬೆಂಗಳೂರು, ೧೯೮೩.
२. नाट्यशास्त्रम्, चतुर्थो भागः, सं. डा. रविशङ्कर् नागर्, परिमल् पब्लिकेशन्स्, दिल्ली, १९८४
३. ಕರ್ಣಾಟಕಸಂಗೀತವಾಹಿನಿ, ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಡಾ. ರಾ. ಸತ್ಯನಾರಾಯಣ, ಕನ್ನಡ ಪುಸ್ತಕ ಪ್ರಾಧಿಕಾರ, ಬೆಂಗಳೂರು, ೨೦೦೧.
४. महर्षिवाल्मीकिप्रणीत श्रीमद्वाल्मीकीय रामायण, खण्ड १-२, गीताप्रेस्, गोरखपुर, २०१४
५. Collected Writings on Indian Music, Vol-I-III, Dr V Raghavan, Dr V Raghavan Centre for Performing Arts, Chennai, 2020.
६. *Welcome to Valmiki Ramayana: Valmiki Ramayanam*. Welcome to Valmiki Ramayana | Valmiki Ramayanam. (n.d.). https://www.valmiki.iitk.ac.in/